# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

# सत्रान्तपरीक्षा, नवम्बर्-दिसम्बर्-२०१६

| | | |
|---|---|---|
| **कक्षा- शास्त्री-३ (SEM-5)** | **प्रश्नपत्र-५** | **गुणाः - ७०** |
| **विषयः- साहित्यम्** | **CC-359** | **समयः - ११ तः ०२** |
| **दिनाङ्कः - २९/११/२०१६** | **सन्दर्भग्रन्थः - काव्यमीमांसा ( १,२,४,५ अध्यायाः )** | |

॥ प्रथमान्वितिः ॥

**प्र-१ द्वयोः ससन्दर्भं व्याख्या कार्या ।** ०८

१. यायावरीयः सङ्क्षिप्य मुनीनां मतविस्तरम् ।
व्याकरोत् काव्यमीमांसा कविभ्यो राजशेखरः ॥

२. सर्गः प्रतिसंहारः कल्पो मन्वन्तराणि वंशविधिः ।
जगतो यत्र निबद्धं तद् विज्ञेयं पुराणमिति ।

३. विद्यास्थानानां गन्तुमन्तं न शक्तो जीवेद्वर्षाणां योऽपि साग्रं सहस्रम् ।
तस्मात्सङ्क्षेपादर्थसन्दोह उक्तो व्यासः संत्यक्तो ग्रन्थभीरुप्रियार्थम् ॥

**प्र-२ कस्याप्येकस्य उत्तरं लिखत ।** ०८

१. राजशेखरस्य परिचयं दत्त्वा तद्वैशिष्ट्यं समीक्षत ।

२. काव्यमीमांसायाः वैशिष्ट्यं दत्त्वा वाङ्मयभेदान् निरूपयत ।

**प्र-३ द्वयोः टिप्पणी लेख्या ।** ०४

१. विद्यास्थानानि ।

२. उपविद्याः ।

३. षड्दर्शनानि ।

४. वेदाङ्गानां लक्षणानि ।

**प्र-४ पञ्चानाम् एकवाक्येन उत्तराणि लिखत ।** ०५

१. काव्यमीमांसायाः द्वितीयाध्यायस्य नाम किम्?

२. परमेष्ठीः अर्थात् कः?

३. राजशेखरः यायावरीयः कथं कथ्यते?

४. श्रीकण्ठस्य के शिष्याः आसन्?

५. श्रीकण्ठः कति शिष्येभ्यः काव्यमुपदिदेश?

६. शास्त्रं कतिविधम्?

७. के उपवेदाः?

॥ द्वितीयान्वितिः ॥

**प्र-५ द्वयोः ससन्दर्भं व्याख्या कार्या ।** ०८

१. बुद्धिमत्त्वं च काव्याङ्गविद्या स्वभ्यासकर्म च ।
कवेश्चोपनिषच्छक्तिस्त्रयमेकस्य दुर्लभम् ॥

२. प्रतिभातारतम्येन प्रतिष्ठा भुवि भूरिधा ।
भावकस्तु कविः प्रायो न भजत्यधमां दशाम् ॥

३. सारस्वतं किमपि तत्सुमहारहस्यं यद्गोचरं च विदुषां निपुणैकसेव्यम् ।
तत्सिद्धये परमयं परमोऽभ्युपायो यच्चेतसो विदितवेद्यविधेः समाधिः ॥

**प्र-६ कस्यचिदेकस्य उत्तरं यच्छत ।** **०८**

१. बुद्धिमानाहार्यबुद्ध्योः भेदं दत्त्वा आहार्यबुद्धेः स्वरूपं दर्शयत ।

२. कवेः सर्वान् भेदान् सोदाहरणं वर्णयत ।

**प्र-७ द्वयोरेका टिप्पणी विधेया ।** **०२**

१. शिष्याणां वर्गीकरणम् ।

२. चतुर्थाध्यायसारः ।

**प्र-८ द्वयोः लघूत्तरं दत्त ।** **०२**

१. कस्मात् काव्यविद्यायाः सर्वतः श्रेष्ठत्वम्?

२. का नाम मीमांसा?

३. साहित्यविद्यायाः किं स्वरूपम्?

४. बुद्धेः कति भेदाः?

**॥ तृतीयान्वितिः ॥**

**प्र-९ द्वयोः ससन्दर्भं व्याख्या कार्या ।** **०८**

१. न प्राप्तं विषमरणं प्राप्तं पापेन कर्मणा विषमरणं च ।
न मृतो भागीरथ्यां मृतोऽहमुपगुह्य मन्दभागी रथ्याम् ॥

२. यत्पदानि त्यजन्त्येव परिवृत्तिसहिष्णुताम् ।
तं शब्दन्यासनिष्णाताः शब्दपाकं प्रचक्षते ॥

३. सम्यगभ्यतः काव्यं नवधा परिपच्यते ।
हानोपादानसूत्रेण विभजेत् तद्धि नबुद्धिमान् ॥

**प्र-१० एकस्य समीक्षा कार्या ।** **०८**

१. पाकभेदान् सोदाहरणं समीक्षत ।

२. व्युत्पत्तिस्वरूपं यथाधीतं समीक्षत ।

**प्र-११ द्वयोः टिप्पणी विधेया ।** **०४**

१. पञ्चमोऽध्यायः ।

२. शास्त्रकवयः ।

३. त्याज्यपाकाः के?

४. कवित्वपाकः ।

**प्र-१२ पञ्चप्रश्नाः एकवाक्येन समाधेयाः ।** **०५**

१. कः परिणामः?

२. को महाकविः?

३. कवीनां काव्यपाकस्य कति भेदाः भवन्ति?

४. अलङ्कारकवेः कौ द्वौ भेदौ स्तः?

५. का नाम व्युत्पत्तिः?

६. भावयित्री प्रतिभा किं करोति?

७. शब्दकवेः के त्रयो भेदाः सन्ति?